# नारायण सूक्तम्

ॐ स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै । ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑ ॥ ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥

ॐ ॥ स॒ह॒स्र॒शी॑र्षं दे॒वं॒ वि॒श्वाक्षं॑ वि॒श्वशं॑भुवम् । विश्वं॑ ना॒राय॑णं दे॒व॒म॒क्षरं॑ पर॒मं प॒दम् । वि॒श्वतः॒ पर॑मान्नि॒त्यं॒ वि॒श्वं ना॑राय॒णग्ं ह॑रिम् । विश्व॑मे॒वेदं पु॑रु॒ष॒-स्तद्विश्व-मु॑पजीवति । पति॒ं विश्व॑स्या॒त्मेश्व॑र॒ग्ं॒ शाश्व॑तग्ं शि॒व-मच्युतम् । ना॒राय॒णं म॑हाज्ञे॒यं॒ वि॒श्वात्मा॑नं प॒राय॑णम् । ना॒राय॒णप॑रो ज्यो॒ति॒रा॒त्मा ना॑राय॒णः प॑रः । ना॒राय॒णप॑रं ब्र॒ह्म॒ त॒त्त्वं ना॑राय॒णः प॑रः । ना॒राय॒णप॑रो ध्या॒ता॒ ध्या॒नं ना॑राय॒णः प॑रः । यच्च॑ कि॒ञ्चिज्जगत्स॒र्वं॒ दृ॒श्यते॑ श्रूय॒तेऽपि॑ वा ॥

अन्त॑र्ब॒हिश्च॑ तत्स॒र्वं॒ व्या॒प्य ना॑राय॒णः स्थि॑तः । अनन्त॒मव्ययं॑ क॒विग्ं स॑मु॒द्रेऽन्तं॑ वि॒श्वशं॑भुवम् । प॒द्मको॒श-प्र॑तीका॒श॒ग्ं॒ हृदयं॑ चाप्य॒धोमु॑खम् । अधो॑ नि॒ष्ट्या वि॑तस्या॒न्ते॒ ना॒भ्याम॑पुरि॒ तिष्ठ॑ति । ज्वा॒ल॒मा॒लाकु॑लं भा॒ती॒ वि॒श्वस्याय॑त॒नं म॑हत् । सन्त॑तग्ं शि॒लाभि॑स्तु॒ लम्ब॒त्याको॒श॒सन्नि॑भम् । तस्या॒न्ते सु॑षि॒रग्ं सू॒क्ष्मं तस्मि॑न्त्स॒र्वं प्रति॑ष्ठितम् । तस्य॒ मध्ये॑ म॒हान॑ग्नि॒र्-वि॒श्वार्चि॑र्-वि॒श्वतो॑मुखः । सोऽग्र॑भु॒ग्विभ॑जन्ति॒ष्ठ॒-न्नाहा॑रमज॒रः क॒विः । ति॒र्य॒गू॒र्ध्वम॑धश्शा॒यी॒ र॒श्मय॑स्तस्य॒ सन्त॑ता । स॒न्ता॒पय॑ति स्वं दे॒हमापा॑दतल॒मस्त॑कः । तस्य॒मध्ये॒ वह्नि॑शिखा अ॒णीयो॑र्ध्वा व्य॒वस्थि॑तः । नी॒लतो॑-यद॑मध्य॒स्था॒द्-वि॒ध्युल्ले॑खे॒व॒ भास्व॑रा । नी॒वा॒र॒शूक॑वत्त॒न्वी॒ पी॒ता

भा᳚स्वत्य॒णूप॑मा । तस्याः᳚ शिखा॒या म॑ध्ये᳚ प॒रमा᳚त्मा व्य॒वस्थि॑तः । स ब्रह्म॒ स शिवः॒ स हरिः॒ से᳚न्द्रः॒ सो᳚ऽक्ष॑रः पर॒मः स्व॒राट् ॥

ऋतग्ं स॒त्यं प॑रं ब्र॒ह्म॒ पु॒रु॒षं॑ कृष्ण॒पिङ्ग॑लम् । ऊ॒र्ध्वरे᳚तं वि॑रूपा॑क्ष॒ं वि॒श्वरू॑पाय॒ वै नमो॒ नमः॑ ॥

ॐ ना॒रा॒य॒णाय॑ वि॒द्महे᳚ वासु॒दे᳚वाय॑ धीमहि । तन्नो᳚ विष्णुः प्रचो॒दया᳚त् ॥

ॐ शान्तिः॒ शान्तिः॒ शान्तिः॑ ॥